# ~ भजन मणडली (Part 2) ~

– Compiled by जय गोविन्द दास @ www.JayaGovinda.Life –

# I #

## श्रीराधिकाष्टकम् (३)

कुंकुमाक्त–काञ्चनाब्ज–गर्वहारि–गौरभा
पीतनाञ्चिताब्ज–गन्धकीर्ति निन्दि–सौरभा।
बल्लवेश–सूनु–सर्व–वाञ्छितार्थ–साधिका
मह्यमात्म–पादपद्म–दास्यदास्तु राधिका।।१।।

कौरविन्द–कान्ति–निन्दि–चित्र–पट्ट–शाटिका
कृष्ण–मत्तभृङ्ग–केलि–फुल्ल–पुष्प–वाटिका।
कृष्ण–नित्य–सङ्गमार्थपद्मबन्धु–राधिका
मह्यमात्म–पादपद्म–दास्यदास्तु राधिका।।२।।

सौकुमार्य–सृष्ट–पल्लवालि–कीर्ति–निग्रहा
चन्द्र – चन्दनोत्पलेन्दु–सेव्य – शीत–विग्रहा।
स्वाभिमर्ष–बल्लवीश–काम–ताप–बाधिका
मह्यमात्म–पादपद्म–दास्यदास्तु राधिका।।३।।

विश्ववन्द्य–यौवताभिवन्दितापि या रमा
रूप–नव्य–यौवनादि–सम्पदा न यत्समा।
शील–हार्द–लीलया च सा यतोऽस्ति नाधिका
मह्यमात्म–पादपद्म–दास्यदास्तु राधिका।।४।।

रास–लास्य गीत–नर्म–सत्कलालि–पण्डिता
प्रेम–रम्य–रूप वेश–सद्गुणालि–मण्डिता।
विश्व–नव्य–गोप–योषिदालितोऽपि याधिका
मह्यमात्म–पादपद्म–दास्यदास्तु राधिका।।५।।

नित्य–नव्य–रूप केलि–कृष्णभाव–सम्पदा
कृष्णराग–बन्ध–गोप–यौवतेषु–कम्पदा।
कृष्ण–रूप–वेश–केलि–लग्न–सत्समाधिका
मह्यमात्म–पादपद्म–दास्यदास्तु राधिका।।६।।

स्वेद–कम्प–कण्टकाश्रु–गद्गदादि–सञ्चिता–
मर्ष–हर्ष–वामतादि–भाव–भूषणाञ्चिता।
कृष्ण–नेत्र–तोषि–रत्न–मण्डनालि–दाधिका
मह्यमात्म–पादपद्म–दास्यदास्तु राधिका।।७।।

या क्षणार्ध–कृष्ण–विप्रयोग–सन्ततोदिता–
नेक–दैन्य–चापलादि–भाववृन्द–मोदिता।
यत्नलब्ध–कृष्णसङ्ग–निर्गताखिलाधिका
मह्यमात्म–पादपद्म–दास्यदास्तु राधिका।।८।।

अष्टकेन यस्त्वनेन नौति कृष्णवल्लभां
दर्शनेऽपि शैलजादि–योषिदालि–दुर्लभाम्।
कृष्णसङ्ग–नन्दितात्म–दास्य–सीधु–भाजनं
तं करोति नन्दितालि–सञ्चयाशु सा जनम्।।९।।
(श्रील कृष्णदास कविराज गोस्वामी विरचित)

# II #

## श्रीराधाकृपाकटाक्ष-स्तवराज

मुनीन्द्रवृन्द-वन्दिते त्रिलोक-शोक-हारिणी
प्रसन्न-वक्त्र-पङ्कजे निकुञ्ज-भू-विलासिनि।
व्रजेन्द्र-भानु-नन्दिनि व्रजेन्द्र-सूनु-सङ्गते
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।१।।
अशोक-वृक्ष-वल्लरी-वितान-मण्डप-स्थिते
प्रवालवाल-पल्लव प्रभाऽरुणांघ्रि कोमले।
वराभय - स्फुरत् - करे प्रभूत - सम्पदालये
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।२।।
अनङ्ग - रङ्ग मङ्गल - प्रसङ्ग - भंगुरभ्रुवां
सविभ्रमं समंभ्रमं दृगन्त-बाण-पातनै।
निरन्तरं वशीकृत - प्रतीति - नन्दनन्दने
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।३।।

तडित्-सुवर्ण-चम्पक-प्रदीप्त-गौर-विग्रहे
मुखप्रभा-परास्त-कोटि-शारदेन्दुमण्डले।
विचित्र - चित्र - संचरच्चकोर - शावलोचने
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।४।।
मदोन्मदाति - यौवने प्रमोद - मान - मण्डिते
प्रियानुराग-रञ्जिते कला-विलास-पण्डिते।
अनन्य-धन्य-कुञ्ज-राज्य-काम केलि-कोविदे
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।५।।
अशेष - हाव - भाव-धीर - हीरहार - भूषिते
प्रभूतशातकुम्भ-कुम्भ-कुम्भि कुम्भ-सुस्तनि।
प्रशस्त-मन्द-हास्य-चूर्ण-पूर्ण-सौख्यसागरे
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।६।।

मृणाल–वाल–वल्लरी तरङ्ग–रङ्ग–दोर्लते
लताग्र–लास्य–लोल–नील–लोचनावलोकने।
ललल्लुलन्मिलन्मनोज्ञ मुग्ध – मोहनाश्रिते
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।७।।
सुवर्ण–मालिकाञ्चित–त्रिरेख–कम्बु–कण्ठगे
त्रिसूत्र–मङ्गलीगुण–त्रिरत्न–दीप्ति–दीधिति।
सलोल – नीलकुन्तल प्रसून – गुच्छ – गुम्फिते
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।८।।
नितम्ब–बिम्ब–लम्बमान–पुष्प–मेखलागुणे
प्रशस्त रत्न–किङ्किणी–कलाप–मध्य मञ्जुले।
करीन्द्र–शुण्ड – दण्डिका – वरोह–सौभगोरुके
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।९।।

अनेक – मन्त्रनाद – मञ्जु – नूपुरारवस्खलत्
समाज–राजहंस–वंश–निक्वणातिगौरवे।
विलोल–हेम–वल्लरी विडम्बि–चारु चङ्क्रमे
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।१०।।
अनन्त–कोटि–विष्णुलोक–नम्र–पद्मजार्चिते
हिमाद्रिजा–पुलोमजा–विरिंचजा–वरप्रदे।
अपार–सिद्धि–ऋद्धि–दिग्ध–सत्पदांगुली–नखे
कदा करिष्यसीह मां कृपाकटाक्षभाजनम्।।११।।
मखेश्वरि क्रियेश्वरि स्वधेश्वरि सुरेश्वरि
त्रिवेद–भारतीश्वरि प्रमाण–शासनेश्वरि।
रमेश्वरि क्षमेश्वरि प्रमोद काननेश्वरि
व्रजेश्वरि व्रजाधिपे श्रीराधिके नमोऽस्तुते।।१२।।

इतीममद्भुतं – स्तवं निशम्य भानुनन्दिनी
करोतु सन्ततं जनं कृपाकटाक्षभाजनम्।
भवेत्तदैव – सञ्चित – त्रिरूप – कर्म – नाशनं
भवेत्तदा –व्रजेन्द्र –सूनु –मण्डल –प्रवेशनम्।।१३।।